न्तरपौष्णभानां तदग्रभानाञ्च यदन्तरालम्। अभुक्तमूलं प्रहरप्रमाणं त्यजेत् सुतं तत्र भवां सुताञ्चेति”। अतएव पूर्व्वमुक्ते वशिष्ठवाक्ये केचिदित्यन्यमताभिप्रायेण यतस्तद्वाक्ये केचिदिति अपरे इति चेत्युक्तिरस्ति यद्येवं घटीन्यूनाधिकभावाभिधायिनां प्रागुक्तवाक्यानां का गतिरिति चेत्। उच्यते दोषस्याधिक्याल्पत्वसूचनमेव गतिः। अथाभुक्तमूलसंज्ञाकथनस्य प्रयोजनमाह जातमिति। तत्राभुक्तमूलाख्ये काले जातं शिशुं बालकम् उपलक्षणत्वात्तत्र जातां कन्यां वा पिता परित्यजेन्निष्कासयेत् “त्यजेत् सुतं तत्रभवां सुताञ्चेति” वशिष्ठोक्तेः। यद्यशक्यं निष्कासनं स्यात्तदा किं कार्य्यमित्यत आह वेति वा अथ वा पूर्व्वपक्षकर्त्तव्यताशक्तौ पिताऽस्य शिशोः कन्याया वा मुखमष्ट समाः अष्टौ वर्षाणि “संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समा” इत्यमरः तावत् कालं न पश्येत् यदाह नारदः “अभुक्तमूलजं पुत्त्रं पुत्त्रीमपि परित्यजेत्। अथवाब्दाष्टकं तातस्तन्मुखं न विलोकयेदिति’। च्यवनोऽपि “अभुक्तमूलभेभवं परित्यजेच्च बालकम्। समाष्टकं पिताऽथ वा न तन्मुखं विलोकयेत्” इति गण्डान्तदोषस्तु विवाहप्रकरणे वक्ष्यत इति कृत्वाऽत्र नोक्तः (तच्चोपयमशब्दे १२५८ पृ° दर्शितम्)। अथ प्रसङ्गान् मूलाश्लेषा जातस्य बालस्य चरणवशेन शुभाशुभफलमुपजात्याह आद्ये इति मूलनक्षत्रस्याद्ये पादे प्रथमे चरणे चतुर्थांशे इति यावत् तत्र जातस्य शिशोः कन्याया वा पिता नाशं मरणमुपैति प्राप्नोति तथा मूलद्वितीयपादे जननी माता नाशमुपैति। तथा तृतीयमूलपादे धनं द्रव्यं नाशमुपैति चतुर्थो मूलपादोऽस्य शिशोः शुभः शुभफलदः। उक्तञ्च ब्रह्मपुराणे “मूलाद्येंऽशे पितुर्नाशो द्वितीये मातुरेव च। तृतीये धनधान्यादिनाशस्तुर्य्ये धनागमः” इति। तुर्य्ये चतुर्थे रत्नमालायाम् “तदाद्यपादके पिता विपद्यते जनन्यथ। तृतीयके धनक्षयश्चतुर्थकः शुभावहः” इति। अत्र पितुर्बहुस्त्रीकत्वेऽपि स्वमातुरेव नाशो वाच्यो न सापत्नमातुः यदाह कश्यपः “मूलाद्यपादजो हन्ति पितरन्तु द्वितीयजः। मातरं स्वां तृतीयोऽर्थान् सुहृदश्च तुरीयजः” इति। यतो मातृशब्दः सापत्नमातुरपि वाचकः। यदाह गौतमः “पितृपत्न्यः सर्व्वा मातरस्तद्भ्रातरो मातुलास्तदपत्यानि मातुलेयानीति। अतः स्पष्टार्थमेव कश्यपवाक्ये स्वामिति पदोपादानम्। अत्र विशेषो वशिष्ठसंहितायां “मूलाद्यपादो दिवसे यदि स्यात्तज्जः पितुर्नाशनकारणं स्यात्। द्वितीयपादो यदि रात्रिभागे तदुद्भवो मातृविनाशकः स्यात्। मूलाद्यपादो यदि रात्रिभागे तदात्मनो नास्ति पुनर्विनाशः। द्वितीयपादो दिनगो यदि स्यान्न मातुरल्पोऽपि तदास्ति दोषः” इति। नारदसंहितायाञ्च “दिवाजातस्तु पितरं रात्रौ तु जननीं तथा। आत्मानं सन्ध्ययोर्हन्ति नान्यगण्डं विवर्जयेदिति”। एतदेव मातापितृगण्डमिति जीर्णा व्यवहरन्ति। अथ दोषसत्त्वे किं कार्य्यमत आह अथेति। अथानन्तरं शान्त्या मूलाश्लेषाशान्त्यास्वनुष्ठितया सर्व्वत्र चरणचतुष्टयेऽपि शुभमनिष्टफलनाशकं कल्याणं स्यात् उक्तञ्च वशिष्ठेन “नैरृत्यभौजङ्गमगण्डदोषनिवारणायाभ्युदयाय नूनम्। पितामहोक्तां रुचिरां च शान्तिं प्रवच्मि लोकस्य हिताय सम्यक्। शास्त्रोक्तरीत्या खलु सूतकान्ते मासे तृतीयेऽप्यथ वत्सरान्ते” इति। नैरृत्यं मूलं तद्दोषः। भौजङ्गमश्लेषा तद्दोषः गण्डो वक्ष्यमाणस्तद्दोषश्च द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यत इति न्यायात् अतस्तद्दोषाणां निवारणं तदर्थम् अतएव कश्यपेन “तद्दोषशमनार्थे हि शान्तिं कुर्य्यात् प्रयत्नतः” इति सामान्यत उक्तम्। अत्र वशिष्ठवाक्ये कालत्रयकथनं सामर्थ्यासामर्थ्यकृतं ध्येयं तथा हि यदि मातुः शीतोदकस्नाने सामर्थ्यं स्यात् तदा सूतकान्त एव शान्तिस्तत्राप्यशक्तौ तृतीये मासि शान्तिः दीर्घरोगादिना तदाप्यशक्तिश्चेत्तर्हि वर्षसमाप्तिदिवसे शान्तिः। मातृगण्डे तु विशेषस्तेनैवोक्तः “मातृगण्डे सुते जाते सूतकान्ते विचक्षणः। कुर्य्याच्छान्तिं तदृक्षे वा तद्दोषस्यापनुत्तये इति” शिष्टास्तु सर्व्वत्र यस्मिन्नक्षत्रे जन्म तन्नक्षत्र एव शान्तिरिति व्यवहरन्ति। ननु मूलपादचतुष्टयेऽपि शान्तिः कर्त्तव्येत्युक्तं तत्र चतुर्थचरणस्य शुभफलत्वात् शान्तिरयुक्तेति प्रतिभाति “अनिमित्तकृता शान्तिर्निमित्तायोपजायते” स्मरणात्। उच्यते यद्यपि चतुर्थचरणे धनागमरूपं शुभफलमभिहितं तथापि कश्यपेन “सुहृदश्चतुरीयजः” इति सुहृन्नाशरूपस्य फलस्यानिष्टस्योक्तेस्तदपाकरणार्थमवश्यं कर्त्तव्या शान्तिः। न हि कस्यचिद्वैरिनाशवन्मातुलाद्यनेकसुहृन्नाश इष्टः मूलवृक्षपादे पुत्त्रकन्ययोरशुभफलकथनाच्च। मूलवृक्षस्तु समनन्तरमेव मया वक्ष्यते यदि मूलाश्लेषादिदोषसम्भवे शान्तिर्न क्रियते तदानिष्टं भवति एवेत्याह नारदः “वत्स-